# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-2

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

---

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** **10 अंकाः**

**खण्ड : ख : रचनात्मककार्यम्** **15 अंकाः**

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** **25 अंकाः**

**खण्ड : घ : पठित-अवबोधनम्** **30 अंकाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

कृष्णद्वैपायनः महर्षेः पराशरयस्य पुत्रः आसीत्। अस्य माता 'सत्यवती' आसीत्। कृष्णद्वैपायनस्य जन्म एकस्मिन् द्वीपे अभवत्। अस्य वर्णः कृष्णः आसीत्। अतः अयं कृष्णद्वैपायनः कथ्यते। अनेनैव वेदानां संकलनं कृतम्। अतएवायं वेदव्यासः इति नाम्ना प्रसिद्धः जातः। महाभारतकाले सः विद्यमानः आसीत्। स एव 'महाभारत' इतिमहाकाव्यम् अरचयत्। महर्षिः व्यासः अष्टादश पुराणानि अपि अरचयत्। विदुषां मतमस्ति यत् महर्षिणा व्यासेन पूर्व 'पुराणसंहिता' नाम ग्रन्थो रचितः। पश्चात् तेषां शिष्यैः अनेकानि पुराणानि विरचितानि।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) वेदव्यासः कस्य पुत्रः आसीत्?
   (ii) कृष्णद्वैपायनस्य जन्मं कुत्र अभवत्?
   (iii) वेदव्यासः कदा विद्यमानंः आसीत्?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) पुराणानिविषये विदुषां किं मतम् अस्ति?
   (ii) वेदानां संकलेनं केन कृतम्?
   (iii) महाभारतस्य रचयिता कः आसीत्?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'पुराणानि' इति अस्य विशेष्यपदस्य विशेषणपदं किम्?
   (क) विरचितानि
   (ख) पश्चात्
   (ग) अनेकानि
   (ii) 'अरचयत्' इति पदस्य कर्तृपदं किम्?
   (क) शिष्यैः
   (ख) महर्षिः व्यासः
   (ग) पुराणानि
   (iii) 'श्वेतः' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?
   (क) विद्यमानः
   (ख) कृष्णः
   (ग) श्यामः

(iv) अनुच्छेदे ''कृष्णद्वैपायनः इति कस्य पर्यायः अस्ति?
(क) जयदेवस्य
(ख) भारतस्य
(ग) वेदव्यासस्य

**उत्तरम् :**

1. (i) पराशरस्य
(ii) द्वीपे
(iii) महाभारतकाले
2. (i) पुराणानां विषये विदुषां मतम् अस्ति यत् महर्षिणा व्यासेन पूर्व 'पुराणसंहिता' नाम ग्रन्थो रचितः।
(ii) वेदानां संकलनं कृष्णद्वैपायनेन कृतम्।
(iii) महाभारतस्य रचयिता वेदव्यासः आसीत्।
3. **शीर्षक–** वेदव्यासः, व्यासस्य जीवनम्।
4. (i) (ग) अनेकानि
(ii) (ख) महर्षिः व्यासः
(iii) (ख) कृष्णः
(iv) (ग) वेदव्यासस्य

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् आशीषः। भवतां विद्यालये नूतनविधिना वार्षिकोत्सवः आयोजितः। तस्य वर्णनम् अधिकृत्य मित्रं विशालां प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** $1/2 \times 10 = 5$

105, योजनाविहारः
(1) ..........
तिथिः ..........
प्रिय विशाल!
(2) .......... नमस्ते।
ह्यः एव अस्माकं विद्यालये (3) ......... सम्पन्नः जातः। तस्मिन्नेव अहम् अत्यधिकं (4) .......... आसम्। जानासि किम् अभूतपूर्वम् एव आसीत् तस्य? संक्षेपतः वर्णयामि। अस्माकं कक्षा चतुर्ष वर्गेषु विभक्ता। एकः वर्गः निर्धनानां कुटीरेषु गत्वा आवश्यकतानुसारम् अन्नम् वस्त्रम् औषधिं च (5) ..........। द्वितीयः वर्गः मदीयः आसीत्। अस्माभिः समीपवर्तिषु श्रमिकाणाम् आवासेषु (6) .......... सूची निर्मिता येन तेषां शिक्षाव्यवस्था भवेत्। तृतीयेन वर्गेण (7) .......... कृतम्। एवं त्रिभिः दिवसैः समारोहः सम्पन्नः जातः। अनेन सेवाकार्येण सर्वेषां छात्राणां मनसि (8) .......... अनुभूतिः जाता। यदि सर्वे विद्यालयाः एवं कुर्वन्तु तर्हि अस्माकं देशस्य शीघ्रम् एव विकासः प्रगतिश्च भवेत्। (9) .......... नमः।
तव (10) ..........
आशीषः

| मञ्जूषा |
|---|
| पितृभ्याम्, नागपुरतः, दिव्यानन्दस्य, निरक्षरबालकानाम्, व्यस्तः, सप्रेम, वितीर्णवान्, वृक्षारोपणम्, वार्षिकोत्सवसमारोहः, अभिन्नसुहृद् |

**उत्तरम् :**

105, योजनाविहारः
(1) **नागपुरतः**
तिथिः ..........
प्रिय विशाल!
(2) **सप्रेम** नमस्ते।
ह्यः एव अस्माकं विद्यालये (3) **वार्षिकोत्सवसमारोहः** सम्पन्नः जातः। तस्मिन्नेव अहम् अत्यधिकं (4) **व्यस्तः** आसम्। जानासि किम् अभूतपूर्वम् एव आसीत् तस्य? संक्षेपतः वर्णयामि। अस्माकं कक्षा चतुर्ष वर्गेषु विभक्ता। एकः वर्गः निर्धनानां कुटीरेषु गत्वा आवश्यकतानुसारम् अन्नम् वस्त्रम् औषधिं च (5) **वितीर्णवान्**। द्वितीयः वर्गः मदीयः आसीत्। अस्माभिः समीपवर्तिषु श्रमिकाणाम् आवासेषु (6) **निरक्षरबालकानाम्** सूची निर्मिता येन तेषां शिक्षाव्यवस्था भवेत्। तृतीयेन वर्गेण (7) **वृक्षारोपणम्** कृतम्। एवं त्रिभिः दिवसैः समारोहः सम्पन्नः जातः। अनेन सेवाकार्येण सर्वेषां छात्राणां मनसि (8) **दिव्यानन्दस्य** अनुभूतिः जाता। यदि सर्वे विद्यालयाः एवं कुर्वन्तु तर्हि अस्माकं देशस्य शीघ्रम् एव विकासः प्रगतिश्च भवेत्। (9) **पितृभ्याम्** नमः।
तव (10) **अभिन्नसुहृद्**
आशीषः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा–**तिष्ठति, शाखायाम्, चटका, नदी, पर्वतः, वृक्षौ, पुष्पाणि, स्वच्छम्, जलम्, बालौ, सूर्यः, उदेति, वातावरणम्, रमणीयम्, प्रार्थनां, कुरूतः, गृहाणि। |

**उत्तरम् :**

1. अस्मिन् चित्रे सूर्यः उदेति।
2. चित्रे नदी, पर्वतः,वृक्षौ, पुष्पाणि च दृश्यन्ते।
3. स्वच्छं जलं दृश्यते।
4. बालौ प्रार्थनां कुरूतः।
5. शाखायां चटका तिष्ठति।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1\times 5=5$

**''जलम् एवं जीवनम्''**

| |
|---|
| **मञ्जूषा**–अस्माकम्, जलम्, जीवनस्य, अन्नानि, फलानि, स्नानाय, महत्त्वपूर्णम्, क्षेत्राणां, सिञ्चनम्, विना, आधारः। |

**उत्तरम् :**

**जलम् एवं जीवनम्**

जलेन क्षेत्राणां सिञ्चनं क्रियते। जलं स्नानाय आवश्यकं भवति। अनेन विना जीवनम् असंभवम्। जलं जीवनस्य आधारः। इदं हि महत्त्वपूर्णम् अतः **जलम् एव जीवनम्।**

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1\times 5=5$

1. मैं पुस्तकालय जाता हूँ।
   I go to library.
2. वह नाटक बहुत अच्छा है।
   That drama is too good.
3. मोर–पंख भगवान कृष्ण के सिर पर सुंदर लगते हैं।
   Peacock-feather looks beautiful on the head of Lord Krishna.
4. मानसून में आसमान में इंद्रधनुष दिखाई देता है।
   Rainbow is seen in the sky in monsoon.
5. नदी का पानी साफ है।
   River water is clean.
6. एक कपड़ा–बैग हमेशा मेरे पास होता है।
   A cloth-bag is always with me.
7. आयुर्वेद के आठ खंड हैं।
   There are eight sections of Ayurveda.

**उत्तरम् :**

1. अहं ग्रन्थालयं गच्छामि/यामि।
2. तत् नाटकम् अतीव रम्यम् अस्ति।
3. श्रीकृष्णस्य मस्तके मयूरपिच्छं/मयूरबर्हं विराजते/शोभते।
4. वर्षासमये आकाशे इन्द्रचापः/इन्द्रधनुः दृश्यते।
5. नदीजलं स्वच्छं/विमलं वर्तते/विद्यते।
6. मम समीपे वस्त्रस्यूतः सदैव भवति।
7. आयुर्वेदस्य अष्ट विभागाः सन्ति।

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1\times 4=4$

1. सदैव सत् + आचारः रक्षणीयः।
   **उत्तरम् :** सदाचारः
2. पापिनाञ्च सदा दुःखम्।
   **उत्तरम् :** पापिनां + च
3. सः स्व + छन्दम् विहरति।
   **उत्तरम् :** स्वच्छन्दम्
4. कः शुचिरिह?
   **उत्तरम् :** शुचिः + इह
5. मनः दुर्निग्रहं भवति।
   **उत्तरम् :** दुः + निग्रहं

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1\times 4=4$

1. जिह्वालोलुपतया मेषः महानसं प्रविशति स्म।
   (क) जिह्वाया लोलुपतया
   (ख) जिह्वायाः लोलुपतया
   (ग) जिह्वायै लोलुपतया
   **उत्तरम् :** (ख) जिह्वायाः लोलुपतया
2. रामलक्ष्मणौ वनं अगच्छताम्।
   (क) राम लक्ष्मण
   (ख) राम लक्ष्मणः
   (ग) रामः च लक्ष्मणः च
   **उत्तरम् :** (ग) रामः च लक्ष्मणः च
3. भारत भूमिः वीरजननी अस्ति।
   (क) वीराः जननी
   (ख) वीराणां जननी
   (ग) वीरस्य जननी
   **उत्तरम् :** (ख) वीराणां जननी
4. शरणागतस्य रक्षां कुरु।
   (क) शरणम् आगतस्य
   (ख) शरणा + आगतस्य
   (ग) शरणाम आगता
   **उत्तरम् :** (क) शरणम् आगतस्य
5. शब्दार्थौ पठित्वा वदतु।
   (क) शब्दश्च अर्थश्च
   (ख) शब्द च अर्थ
   (ग) शब्दां अर्थं
   **उत्तरम् :** (क) शब्दश्च अर्थश्च

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. आः किम् उक्तवती भवती?
   (क) उक्तवान् + ई
   (ख) उक्तवत् + ई
   (ग) उक्तवत् + ङीप्
   **उत्तरम् :** (ग) उक्तवत् + ङीप्
2. किं ते महत्त्वम्?
   (क) महा + त्व
   (ख) महत् + त्व
   (ग) महत् + त्वं
   **उत्तरम् :** (ख) महत् + त्व
3. विपणीनां शोभा अनुपमा भविष्यति।
   (क) अनुपम+टाप्
   (ख) अनुपम+आप्
   (ग) अनुपम+चाप्
   **उत्तरम् :** (क) अनुपम+टाप्
4. मम देशः शक्ति+मतुप् भवेत्।
   (क) शक्तिमान्
   (ख) शक्तिवानः
   (ग) शक्तिमत्
   **उत्तरम् :** (क) शक्तिमान्
5. पूर्णिमायां चन्द्रस्य सुन्दरता दर्शनीया भवति।
   (क) सुन्द + रता
   (ख) सुन्दर + तल्
   (ग) सुन्दर + ता
   **उत्तरम् :** (ख) सुन्दर + तल्

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

**रामः**- मित्र! सम्प्रति त्वं किं लिखसि?
**श्यामः**- बन्धो! मया सम्प्रति पत्रं (1) ..........।
**रामः**- किम् त्वया (2). .......... अपि पठयन्ते?
**श्यामः**- आम् अहं पुस्तकानि अपि (3) ..........।
**रामः**- मित्र! एतत् चित्रम् कः करोति?
**श्यामः**- एतत् चित्रम मया एव क्रियते।

| मञ्जूषा |
|---|
| पठामि, लिख्यते, पुस्तकानि। |

**उत्तरम् :**
(1) लिख्यते, (2) पुस्तकानि, (3) पठामि।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. रामः ग्रामं गच्छति।
2. छात्रः धनं ददाति।
3. सः त्वां पश्यति।
4. त्वं मां कथयसि।
5. सः ग्रन्थम् लिखति।

**उत्तरम् :**
1. रामेण ग्रामः गम्यते।
2. छात्रेण धनं दद्यते।
3. तेन त्वं दृश्यसे।
4. त्वया अहं कथ्ये।
5. तेन ग्रन्थः लिख्यते।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. प्रातः (9:00) .......... वादने छात्राः गृहात् आगमिष्यन्ति।
2. प्रातः (9:15) .......... वादने सरस्वती वन्दना।
3. प्रातः (9:30) .......... वादने सांस्कृतिक-कार्यक्रमाः।
4. प्रातः (10:45) .......... वादने प्रधानाचार्येण वार्षिक विवरणं प्रस्तूयते।
5. प्रातः (11:00) .......... वादने मुख्यातिथिना पुरस्कार वितरणम्।

**उत्तरम् :**
1. नव
2. सपादनव
3. सार्द्धनव
4. पादोन-एकादश
5. एकादश

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. जननी जन्म भूमिश्च स्वर्गाद् ......... गरीयसी।
2. शिशु ......... चलति।
3. त्वम् .......... समागतोऽसि।
4. यदा कृष्णः अत्र आगच्छत् .......... वृष्टिः अभवत्।
5. तदैव तौ श्रुत्वा ......... काकः प्रविशति।
6. .......... अहम् भ्रमणाय गमिष्यामि।
7. समुद्रेषु वृष्टिः ........ ।
8. पश्य वानराः वृक्षेषु .......... कूर्दन्ति।

| मञ्जूषा |
|---|
| तदा, सहसा, अपि, शनैः, कुतः, वृथा, इतस्ततः, इदानीम् |

**उत्तरम् :**

1. अपि
2. शनैः
3. कुतः
4. तदा
5. सहसा
6. इदानीम्
7. वृथा
8. इतस्ततः

**11.अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)**

$1 \times 3 = 3$

1. ताः समाचारपत्रं पठसि। (पठथः/पठतः/पठन्ति)
2. वयं ह्यः विज्ञानं पठिष्यावः। (अपठाव/अपठाम/अपठः)
3. सः बालिका क्रीडति। (बाला/बालकः/बालकौ)
4. त्वं कदा नाटकं द्रक्ष्यन्ति? (पश्यथः/द्रक्ष्यामि/द्रक्ष्यसि)

**उत्तरम् :**

1. पठन्ति
2. अपठाव
3. बालकः
4. द्रक्ष्यसि

**खण्डः – घ 30 अंकाः**

## पठित–अवबोधनम्

**12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?
   (ii) कः क्षेत्रे पपात?
   (iii) क्रुद्धः कृषकः कम् उत्थापयितुं यत्नमकरोत्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) बलीवर्दयोः एकः कीदृशः आसीत्?
   (ii) कृषकः कम् तोदनेन नुद्यमानः अवर्तत?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'अनेकवारम्' इतस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
   (क) नुद्यमानः
   (ख) बहुवारम्
   (ग) हलमूढ्वा
   (ii) 'वृषभम्' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?
   (क) क्षेत्रकर्षणम्
   (ख) गन्तुम्
   (ग) दुर्बलम्
   (iii) 'कृषीवलः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?
   (क) अवर्तत
   (ख) अकरोत्
   (ग) पपात
   (iv) 'पपात' क्रियायाः कर्तृपदं किम्?
   (क) वृषभः
   (ख) कृषकः
   (ग) क्षेत्रम्

**उत्तरम् :**

1. (i) बलीवर्दाभ्याम्।
   (ii) वृषभः।
   (ii) वृषभम्।
2. (i) बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।
   (ii) कृषकः दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।
3. (i) (ख) बहुवारम्
   (ii) (ग) दुर्बलम्
   (iii) (ख) अकरोत्
   (iv) (क) वृषभः

**13.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

शरीरायासजननं कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) किं कृत्वा सुखं प्राप्यते?
   (ii) समन्ततः किम् विमृद्नीयात्?
   (iii) शरीरायासजननं कर्म किं कथ्यते?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) कीदृशं कर्म व्यायामसंज्ञितं कथ्यते?
   (ii) व्यायामं कृत्वा किं प्राप्यते?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'व्यायामः' इत्यस्य श्लोके क्रियापदम् अस्ति?
   (क) संज्ञितम्
   (ख) कर्म
   (ग) कृत्वा
   (ii) 'शरीरम्' इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखत।
   (क) सुखम्
   (ख) देहम्
   (ग) कृत्वा

(iii) 'शरीरायासजननम्' इत्यस्य पदस्य किं विशेष्यपदं श्लोके प्रयुक्तम्?

(क) व्यायामम्

(ख) प्राप्यते

(ग) कर्म

(iv) 'दुःखम्' इत्यस्य पदस्य विलोमपदं श्लोके प्रयुक्तम् ?

(क) जननम्

(ख) समन्ततः

(ग) सुखम्

**उत्तरम् :**

1. (i) व्यायामम्।
   (ii) देहम्।
   (iii) व्यायामम्।
2. (i) शरीरायासजननं कर्म व्यायामं कथ्यते।
   (ii) व्यायामं कृत्वा सुखं प्राप्यते।
3. (i) (क) संज्ञितम्।
   (ii) (ख) देहम्।
   (iii) (ग) कर्म।
   (iv) (ग) सुखम्।

**14.अधोलिखित नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

उभौ– (अनिच्छां नाटयतः) राजन्!
अलमतिदाक्षिण्येन।

रामः– अलमतिशालीनतया।
भवति शिशुजनो वयोऽनुरोधाद्
गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात्
पशुपति–मस्तक–केतकच्छदत्वम्।।

रामः– एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि– क्षत्रियकुलपितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता?

लवः– भगवन् सहस्रदीधितिः।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) गुणमहतामपि वयोऽनुरोधात् कः लालनीयः एव भवति?
   (ii) कः पशुपति–मस्तक–केतकच्छदत्वं व्रजति?
   (iii) कुशलवयोः वंशस्य कर्त्ता कः?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) गुणमहतामपि कस्मात् शिशुजनः लालनीयः एव भवति?
   (ii) हिमकरोऽपि बालभावात् किं व्रजति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'रामः' इत्यस्य नाट्यांशे क्रियापदं किम्?
   (क) पृच्छामि
   (ख) लालनीयः
   (ग) भवति
   (ii) 'लालनीयः' इत्यस्य गद्यांशे किं विशेष्य पदं प्रयुक्तम्?
   (क) शिशुजनः
   (ख) हिमकरः
   (ग) सूर्यः
   (iii) 'ताडनीयः' इत्यस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?
   (क) अलम्
   (ख) व्रजति
   (ग) लालनीयः
   (iv) 'व्रजति' इति क्रियापदस्य कर्तृपदं किम्?
   (क) सूर्यः
   (ख) हिमकरः
   (ग) लवः

**उत्तरम् :**

1. (i) शिशुजनः।
   (ii) हिमकरः।
   (iii) सूर्यः।
2. (i) गुणमहतामपि वयोऽनुरोधात् शिशुजनः लालनीयः एव भवति।
   (ii) हिमकरोऽपि बालभावात् पशुपति–मस्तक–केतकच्छदत्वम् व्रजति।
3. (i) (क) पृच्छामि
   (ii) (क) शिशुजनः
   (iii) (ग) लालनीयः
   (iv) (ख) हिमकरः

**15.रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. श्रृगालेन पुरा त्रयः व्याघ्राः आनीय दत्ता।
2. राजसिंहस्य भार्या बुद्धिमती आसीत्।
3. बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
4. मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।
5. सा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद।

**उत्तरम् :**

1. श्रृगालेन पुरा कति व्याघ्राः आनीय दत्ता?
2. राजसिंहस्य भार्या कीदृशी आसीत्?
3. बुद्धिमती पुत्रद्वयोपेता कम् प्रति चलिता?
4. मार्गे गहनकानने सा कम् ददर्श?
5. सा धाष्ट्र्यात् पुत्रौ किं कृत्वा जगाद?

**16.मञ्जूषातः समुचितपदानि चित्वा अधोलिखित–श्लोकयोः अन्वयं पूरयत–** $1/2 \times 4 = 2$

I. इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।
व्याघ्रोऽपि सहसा नष्टः गलबद्धश्रृगालकः।।

**अन्वयः–** इति उक्त्वा (1) .......... व्याघ्रमारी (2) .......... धाविता, गलबद्धश्रृगालकः (3) .......... अपि सहसा (4) ..........।

II. शरीरायासजननं कर्म व्यायामसंज्ञितम्। $1/2 \times 4 = 2$
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।

**अन्वयः–** शरीरायासजननं (1) .......... व्यायामसंज्ञितम् (कथ्यते)। तत्कृत्वा तु (2) .......... (प्राप्यते), देहं (3) .......... (4) ..........।

| मञ्जूषा |
|---|
| व्याघ्रः, भयङ्करा, नष्टः, तूर्णम्, सुखं, विमृद्नीयात्, समन्ततः, कर्म |

**उत्तरम् :**

I **अन्वयः** (1) भयङ्करा, (2) तूर्णम्, (3) व्याघ्रः, (4) नष्टः।

II **अन्वयः** (1) कर्म, (2) सुखं, (3)समन्ततः, (4) विमृद्नीयात्।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** $1 \times 4 = 4$

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना।।

**भावार्थः–** वने आयान्तं .......... व्याघ्रं दृष्ट्वा बुद्धिमती अङ्गुल्या .......... कथयति यत्–अरे वञ्चक! त्वया पूर्वम् मम कृते व्याघ्रत्रयं दानाय कथयित्वा अहं .......... ,किन्तु अद्य त्वम् एकमेव व्याघ्रम् आनीय ......... प्रकारेण गच्छसि?

**मञ्जूषा–** तर्जयन्ती, श्रृगालसहितं, केन, समाश्वासिता,

**उत्तरम् :**

**भावार्थः–** वने आयान्तं **श्रृगालसहितं** व्याघ्रं दृष्ट्वा बुद्धिमती अङ्गुल्या **तर्जयन्ती** कथयति यत्–अरे वञ्चक! त्वया पूर्वम् मम कृते व्याघ्रत्रयं दानाय कथयित्वा अहं **समाश्वासिता**, किन्तु अद्य त्वम् एकमेव व्याघ्रम् आनीय **केन** प्रकारेण गच्छसि?

**17.अधोलिखित–कथांशं समुचित–क्रमेण लिखत–** $1/2 \times 8 = 4$

1. चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति।
2. तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।
3. विचित्रा दैवगतिः।
4. तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
5. चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।
6. तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।
7. न्यायाधीशः सर्वं वृत्तमवगत्य तं निर्दोषम् अमन्यत।
8. रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**उत्तरम् :**

1. विचित्रा दैवगतिः।
2. तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
3. तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।
4. चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।
5. चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति।
6. तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।
7. रक्षापुरूषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।
8. न्यायाधीशः सर्वं वृत्तमवगत्य तं निर्दोषम् अमन्यत।

**18.'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत–** $1 \times 3 = 3$ **(केवलं प्रश्नत्रयम्)**

| क | ख |
|---|---|
| उपेता | अपश्यत् |
| कानने | युक्ता |
| ददर्श | उक्तवती |
| जगाद | वने |

**उत्तरम् :**

| | | |
|---|---|---|
| उपेता | = | युक्ता |
| कानने | = | वने |
| ददर्श | = | अपश्यत् |
| जगाद | = | उक्तवती |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. महानगरमध्ये संसरणम् कठिनं वर्तते।
(क) सञ्चलनम्
(ख) जलाशयम्
(ग) अत्यधिकम्
**उत्तरम् :** (क) सञ्चलनम्
2. हिमकरोऽपि बालभावात् पशुपति–मस्तक–केतकच्छदत्वम् व्रजति।
(क) आन्दोलयति
(ख) प्राप्नोति
(ग) कथयति
**उत्तरम् :** (ख) प्राप्नोति

3. विमूढधीः अपक्वं फलं खादति।

(क) बुद्धिहीनः

(ख) विवेकः

(ग) निर्भिकः

**उत्तरम् :** (क) बुद्धिहीनः

4. बाल्ये पुत्राय पिता महत् विद्याधनं यच्छति।

(क) शैशवे

(ख) पुत्राये

(ग) बालकाये

**उत्तरम् :** (क) शैशवे

WWW.CBSE.ONLINE

Download unsolved version of this paper from www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.